# वसुमती

*डॉ. मनोमोहन-आचार्य-प्रणीतस्य गीतमिलिन्द-- काव्यस्य एकादश-गुञ्जनतः समुद्धृता कवितेयम् । गीतमिदं मोहनरागेण गेयम् ।*

श्यामल-मुञ्ज-निकुञ्ज-वसुमती नीलकमल-ललिता,
छिन्न-वनस्पति-कुन्तलकान्तिः भारनता लुलिता ।०।

कालिय-वर्ज्य-गरल-रसपाना,
निर्मल-तटिनी मलपरिधाना,
जीवनयमुना खेदनिवहना, विषरस-दानरता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती.......लुलिता ।१।

गन्धक-पाक्य-कदम्ल-निकाशाः
धीरसमीराः हारितहासाः ।
निर्झरवहनाः सौरभगहनाः, मधुवाताः पिहिताः
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।२।

यन्त्र-पुतनिका-स्तनरसपीनः
क्षीरमहोदधिरवशो दीनः ।
दूषितसलिला, वसुधा सन्ततमजगरगर्भगता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।३।

तनय-कर-परशु-भिन्न-तरुततिः
रोदिति घनवनरेणु-वसुमती ।
कल्पवटी या श्यामलशस्या नितरां धूसरिता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।४।

गन्धवती गल-शव-दलमाला,
स्फीतक-सीसक-पारद-वेला,
व्रीडित-सत्ता पीडितचित्ता सा ननु जर्जरिता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।५।

आणव-शक्ति-परीक्षणशाला,
पुष्कर-वेदी धूमकपाला ।
तारकहारा, निर्मलधारा कल्मषकर्दमिता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।६।

वाम-कामशर-भिन्न-विदीर्णा
जारित-वायु-जरायु-सुवर्मा ।
क्रुद्ध-दिवाकर-पाटल-तीक्ष्णैः शुष्का प्राणलता ।
श्यामल-मुञ्ज-निकुञ्ज-वसुमती......लुलिता ।७।

## अभ्यासः

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**
   (क) वसुमती पूर्वं कीदृशी आसीत्, सम्प्रति कीदृशी सञ्जाता ?
   (ख) जीवन-यमुना किमर्थं खेदनिवहना भवति ?
   (ग) मधुवाताः कथं पिहिताः ?
   (घ) क्षीरमहोदधिः किमर्थम् अवशो दीनः ?
   (ङ) श्यामलसस्या वसुमती कस्माद् हेतोः धूसरिता सञ्जाता ?
   (च) पुष्करवेदी कथं कल्मष-कर्दमिता ?
   (छ) प्राणलता कथं शुष्का जाता ?

2. **निजभाषया संस्कृत-भाषया वा एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**
   (क) का लुलिता सञ्जाता ?
   (ख) का विषरस-दानरता ?
   (ग) के हारित-हासाः ?
   (घ) का आणव-शक्ति-परीक्षण-शाला जाता ?

3. **सन्धिविच्छेदं कुरुत ।**
   महोदधिरवशः, सन्ततमजगरगर्भगता

4. **सन्धिं कुरुत ।**
   तीक्ष्णैः + शुष्का । वनः + पतिः । क्षीरमहोदधिः + अवशः ।

5. **वाक्यानि रचयत ।**
   वसुमती, नीलकमलललिता, धीरसमीराः, रोदिति, शुष्का

●●●